15.08.2026

प्रातः - 06:55

राष्ट्रपति-सम्बोधनम्

अशीतितम-स्वतन्त्रता-पर्वणः पूर्व-सन्ध्यायाम् अमृतेन सम्भाषणेन राष्ट्रं अभिसम्बोधयन्ती राष्ट्रपतिपदासीना द्रौपदी-मुर्मूः प्राहा यत् जागतिक-अशान्तेः युद्ध-विभीषिकायाश्च तमसि अपि भारतीया अर्थव्यवस्था उज्वल-नक्षत्रवत् तीव्रतम-गत्या समेधते। राष्ट्रपतिना प्रोक्तं यत् भारतस्य आर्थिक-संवृद्धिः वैश्विक-संवृद्धिमतिक्रम्य द्विगुणाधिकं यावत् वर्तते।

राष्ट्रपतिना प्रतिपादितं यत् राष्ट्रस्य नक्सल-उत्मूलनम् एका ऐतिहासिकी साफलता अस्ति। सा प्रावोचत् यत् यानि क्षेत्राणि पूर्वं नक्सल-आतङ्केन प्रभावितानि आसन्, तेषु क्षेत्रेषु इदानीम् उत्साह-सन्ततिः विकास-प्रवाहश्च दरीदृश्यते।

राष्ट्रपतिना प्रोक्तं यत् छात्र-वृन्दः राष्ट्र-भविष्यस्य मुख्य-शिल्पि-वर्गः अस्ति; परीक्षा-व्यवस्थायाः परिष्काराय च शासनं प्रतिश्रुतम् अस्ति।

राष्ट्रपतेः अनुसारम् भारतस्य पंचषष्टिः प्रतिशतं युव-जनसङ्ख्या राष्ट्रस्य मुख्या शक्तिः अस्ति, या स्व-प्रयासैः उद्यमितायाः नूतनान् मार्गान् रचयति। अनेन भारतं सप्तचत्वारिंशत् अधिक द्वि सहस्र तमवर्षं यावत् 'विकसित-भारत' निर्माणस्य स्वप्नं साक्षात्कर्तुम् अग्रसरति।

उपराष्ट्रपतिः

उपराष्ट्रपतिः सी.पी. राधाकृष्णन् अवदत् यत् राष्ट्रपतेः स्वतन्त्रता-दिवसस्य पूर्व-सन्ध्यायां एकः शक्तियुतः, प्रेरणादायी च सन्देशः दत्तः, यः एकस्य आत्मविश्वासपूर्णस्य, प्रवर्धमानस्य, जीवन्त-भारतस्य च आकाङ्क्षाः प्रकटीकरोति। सामाजिकान्तर्जालीये स्वीये सन्देशे राधाकृष्णन् इत्यनेन प्रोक्तं यत् राष्ट्रपतेः सम्बोधने यूनाम् आशाः, नारी-शक्तेः योगदानम्, देशस्य आर्थिक-प्रगतिञ्च संस्पृश्य एकस्य सशक्तस्य, समृद्धस्य च राष्ट्रस्य व्यापकं दर्शनम् उपस्थापितम्।

तेन अग्रे प्रतिपादितं यत् एते रवाः राष्ट्र-यज्ञे नागरिक-आहुत्यै दिव्यम् आह्वानं सन्ति।

प्रधानमन्त्री - स्वातन्त्र्यदिवसः

देशः अद्य अशीतितमं स्वातन्त्र्यदिवसम् आचरति। प्रधानमन्त्री नरेन्द्रमोदी दिल्ल्याः ऐतिहासिके रक्तदुर्गे समारोहस्य नेतृत्वं करोति। समारोहस्य अन्तर्गतं भारतीयवायुसेनायाः द्वे एम्.आई.-17 इत्येते विमाने आयोजनस्थले पुष्पवृष्टिं करिष्यतः। राष्ट्रियध्वजारोहणं एकविंशति-भुशुण्डिकानां निनादेन सह समन्वितं भविष्यति। पुष्पवृष्टेः अनन्तरं प्रधानमन्त्री नरेन्द्रमोदी रक्तदुर्गस्य प्राचीरात् राष्ट्रं सम्बोधयिष्यति।

प्रशासकीयविज्ञापनम्

प्रशासनेन दूरदर्शनवाहिनीनां कृते द्वादशनिमेष-परिमितां विज्ञापनावधिसीमां निरसितुं निर्णयः कृतः। सूचनाप्रसारणमन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत् केबल-टेलीविजन-नेटवर्क-नियम, 1994 इत्यस्मिन्, संशोधनस्य राजपत्रे अधिसूचनाप्रकाशनस्य दिनाङ्कात् एषः निर्णयः प्रवर्तिष्यते। मन्त्रालयेन उक्तं यत् दूरदर्शनप्रसारणक्षेत्रे घटितानां परिवर्तनानां दृष्ट्या विज्ञापनावधिसम्बद्धानां प्रावधानानां पुनरवलोकनस्य आवश्यकता अनुभूता। तस्मिन् वक्तव्ये इदमपि उक्तं यत् भारते एतत् क्षेत्रं विज्ञापनस्य उपरि बहुधा आश्रितम् अस्ति, वाहिनी शुल्कप्रदायिनी भवतु अथवा निःशुल्कप्रसारिणी भवतु, तत्र भेदः नास्ति।

मेट्रो-स्वतन्त्रतादिवसः

स्वतन्त्रता-दिवसावसरे अद्यदिल्ली-मेट्रो-सेवाः सर्वेषां कृते अन्तिम-स्थानकेभ्यः प्रातः चतुर्वादनतः एव प्रारब्धाः। दिल्ली-मेट्रो-निगमेन निगदितं यत् एषः निर्णयः स्वतन्त्रता-दिवस-समारोहे सहभागितायै आगच्छतां विशेषातिथीनाम्, आमन्त्रितानाम्, सामान्य-जनसमूहस्य च सुगम-गमनागमनाय गृहीतः। निगमेन स्पष्टीकृतं यत् नियमित-सारण्याः अनुसारं सामान्य-सेवायाः प्रारम्भात् पूर्वम् त्रिंशत्-निमेषाणाम् अन्तरालेन यानानि उपलब्धानि भविष्यन्ति ।

।। इति वार्ताः।।